b) **a** liest sthāsyāmaḥ statt jñāsyāmaḥ und erklärt deshalb sthāsyāmas tacchāsana iti śeṣaḥ; **m₂** sthāsyāmaḥ tadājñāyām iti śeṣaḥ. **Gl** übersetzt nach derselben Lesart: „Laßt uns alle näher treten“.

मुखमुदितविलासं[1] वीक्षमाणः[2] प्रियायाः
सहमधुरिह मन्दं मन्दमायाति कामः ॥ ९ ॥

कामो रतिवसन्ताभ्यां सहोपसृत्य[3] चापगर्भेणाञ्जलिना[a)] सविलासं[b)] प्रणमति ।

महेन्द्रः । आसनान्तिकं हस्तेन निर्दिशन्[4] । सखे काम इहोपविश्यताम् ।

कामो रतिवसन्ताभ्यां सार्धमुपविशति[5] ।

बृहस्पतिः । अये[6] माननीयं भवन्तं स्थाने खलु मानयति[7] महेन्द्रः ।

कामः । अञ्जलिं बद्ध्वा ।

त्रिलोकनाथस्य[8] तवातिशक्तेः[9]
किमस्ति कार्यं मघवन्मयापि ।
प्रकाशिताशेषदिशावकाशो[10]
दिवाकरो दीपमपेक्षते[11] किम्[c)] ॥ १० ॥

बृहस्पतिः । मा भवानेवमाचष्ट[12] ।

असावलोकसामान्यचापविद्याधुरंधरः ।
करोतु कार्यं सकलं बाहुस्तव दिवौकसाम् ॥ ११ ॥

---

1 RB *idita°*. **2** h *vīkṣyaḥmāṇaḥ*, DO *vīkṣyamāṇaḥ*. **3** K om. *Kāmo—ihopaviśyatām*; RB om. *Kāmo*; kK *sārdham upasṛtya*, tg *sārdham upasarpati*; M om. *saha*. **4** D *°ntike*; h *nirdiśayan*, D *nirdaśan*. **5** M om. *saha*; h *sahopaviśati*. **6** RB *ārya*; M om. **7** K *māninīyam*; aMm$_2$ *mānayati khalu sthāne*. **8** ktagm$_2$ *trailokya°*. **9** K *°śakte*. **10** THhO *°divā°*. **11** D *akṣepate*. **12** *eṣam*; kT *ācaṣṭām*.

---

a) cāpagarbheṇa cāpaḥ garbhe kukṣau yasya tena. vīrāṇām prabhunikaṭe sāyudhenāñjalinaiva praṇāmaḥ ācārasiddha iti dhyeyam (**a**).

b) **Gl** „voll Freude". Warum soll sich gerade der Liebesgott nicht „kokett" verneigen dürfen?

c) **Gl** ganz falsch: „Warum bekümmert sich die Sonn' um's Lämpchen?" *kim* ist hier natürlich nur Fragepartikel im Sinne von *num*.

महेन्द्रः । सखे काम[1] ।

चक्रेण विष्णोरपि यद्दुरापं
तरस्विना वा शतकोटिना[a)] मे ।
तत्साधयेत्पुष्पमयं त्वदस्त्र-[2]
महो भवानद्भुतबाहुवीर्यः ॥ १२ ॥

कामः । सगर्वम्[3] । स्वामिन् । यस्ते सापत्न्यमाचरति[4] । दनुजो वा मनुजो[5] वा मुनिरपि वा मुग्धचन्द्रचूडो[b)] वा । सुरलोकसुन्दरीणां[6] स भवतु[7] बद्धः कटाक्षशृङ्खलया ॥१३॥

महेन्द्रो बृहस्पतेर्मुखमवलोकयति[8] ।

बृहस्पतिः[9] । अये काम यस्त्वया[10] चरमोऽर्थः[11] परिगणितो मुग्धचन्द्रचूडो[12] वेति स इदानीं शंकरः शैलराजस्य[13] कटकसीम्नि निरतिशयशीतलान्तःकरणस्तपश्चरति[14] ।

कामः । ततस्ततः ।

बृहस्पतिः[15] । तमिदानीं पितुर्निदेशेन सौभाग्यमयीव[16] शालभञ्जिका सौन्दर्यदेवतेव विग्रहिणी ससखीजना पार्वती परिचरति ।

कामः । ततस्ततः[18] ।

---

1 T om. *Mahendraḥ*; K om. *Kāma*; h *Kāmaḥ*. **2** t *tadastram*. **3** om. h. **4** tOBg *sāpatnam*, M *sāphalyam*. **15** T *danuje, manuje*. **6** D *sakalaloka*°. **7** RB *bhavatu sa*. **8** M *guror* statt *Bṛ*°; T *ālokayati*. **9** om. K; M om. *aye Kāma*. **10** T om. *yas*; K *svayam* st. *tvayā*. **11** D *caramārthaḥ*. **12** t om. *mugdha*. **13** ktag °*rāja*°. **14** TKHhDROBM *niratiśayātiśitalā*° (T °*yātiśitalā*°). **15** D om. *Bṛ*° — *tataḥ* (4. Zeile). **16** O *om. iva*. **17** tagm$_2$ *saparijanā Pārvatī* hinter *nideśena*. **18** ThO om. *tatas*.

---

a) vajrāyudhena (**a**).
b) āhlādakaraś candraḥ bālacandra iti yāvat (**a**).

बृहस्पतिः । तयोश्च संमेलने[1] दिविषदां सुमहती[2] कार्यसिद्धिः । सा[3] च भवन्तमेव[4] कटाक्षयति ।[a)]

कामः । आत्मगतम्[5] । अहो[6] अनात्मज्ञता[7] हि पुंसामात्मनिधनमापादयति यदहमात्मप्रशंसापरवशः[8] परमेश्वरमपि सामान्यवृत्त्या[9] पर्यजीगणम्[10] ।

वसन्तः । आत्मगतम्[11] । अन्यदुपक्रान्तमन्यदेवापतितम्[12] ।

क्वायं[13] सुगन्धिविशिखः[b)] स्वदमानचापः[c)]
स्त्रीणां वशीकरणकर्मणि जागरूकः ।
क्वासौ ललाटनयनानलविस्फुलिङ्ग-[14]
वार्तावशेषितपुरत्रितयो[15] महेशः ॥ १४ ॥

रतिः[16] । अम्हो अच्चाहिदं आपडिदं जं खण्डपरसू जेदव्वो[17] ।

---

1 k t a g m_2 *melane*, D *tayos saṃ°*, O *tayoḥ saṃ°*. 2 t g om. *su*. 3 h *svā*. 4 K *bhagavantam*. 5 h *svā°* |. 6 t a g m_2 om. *aho*. 7 T *anājñatā*, g *anātmatā*. 8 R B om. *aham*. 9 D *sāmāna°*. 10 M *paryagaṇayam*. 11 h *sva°* |. 12 K *anyam*; T K h om. *eva*; O *evāpitam*. 13 K *ko 'yaṃ*. 14 K *°viṣpu°*, H h D R (M ursprünglich) *°viṣphu°*. 15 M *vākyāvaśeṣita°*. 16 K add. *ātmagatam*, h *sva* |. 17 K *aṃhāṇaṃ*, h *ahme*, R g *ahmo*; T *accāṇidaṃ*, h *anvāhidaṃ*, R B *accāhiḍidaṃ*; K R B *āvaḍidaṃ*.

---

a) „Wenn diese Beiden vereinigt werden, dann sehen die Götter ihr großes Werk vollbracht; sie sieht den Ehrwürdigen verliebt von von der Seite an" **Gl**!! Das *sā* des Textes bezieht sich natürlich auf *kāryasiddhiḥ*, wie ohne weiteres klar ist; und *kaṭākṣayati* bedeutet hier „erwartungsvoll auf jemand blicken"; *apekṣata ity arthaḥ* sagen **a** $\mathbf{m}_2$ ganz richtig.

b) „*sugandhi* also means ‚a kind of sweet smelling mango'. Of the five arrows of Cupid, the mango blossom is one" (**a**). Vgl. V, 34. $\mathbf{m}_2$: śobhanaḥ gandhaḥ yeṣāṃ te sugandhayaḥ cūtaviśeṣā eva viśikhāḥ bāṇāḥ yasya.

c) madhurekṣudaṇḍarūpaḥ cāpaḥ yasya saḥ (**a**); ikṣudaṇḍarūpatvena ruciraḥ ($\mathbf{m}_2$). Vgl. V, 34.

कामः । यत्पुनः[1] परिजनपरमाणोर्मत्तो ऽपि[a)] मखभुजः कार्यमिच्छन्ति तदात्मव्ययेनापि[2] कर्म कर्तुमुद्युञ्जे[3] ।

महेन्द्रः ।

संमोहने[4] तव शरे संहितमात्रे गिरीन्द्रकन्यायाः ।
मुखमुदितमुग्धहासं[5] विलो-
कयिष्यति[6] विमुक्तधृतिरीशः[b)] ॥ १५ ॥

तदीषत्करे ऽस्मिन्नर्थे[7] भवता न किंचिदपि[8] शङ्कनीयम् ।

कामः ।

त्यजन्यास्यामि[9] कार्याय प्राणान्प्रियतमानपि[c)] ।
यशःशरीरममलं लभन्ते [10]ह्यनुषङ्गिणः[d)] ॥ १६ ॥

तद्यथादिष्टं[11] स्वामिना तथा करिष्यामि ।

महेन्द्रो बृहस्पतिश्च । हस्तमुद्यम्य ।

---

1 D om. *punaḥ*. **2** M *tad āttavyadhenāpi*. **3** T *abhyuṃje*, t *udyujyate*, M *udyuje*. **4** g °*naṃ*. **5** h *udīta*°, RB *idita*°, m_2 t g a *atimuditavilāsaṃ*, M *mukham indumugdhahāsaṃ*. **6** t g a m_2 *vilokayati*, O *vilokayan bhavati*; T *muktadhṛtiśarīraḥ*, D R t O B M g a m_2 *mugdhadhṛtir*; K om. *r īśaḥ*. **7** k t a g *'smin kārye*, K *tasminn*. **8** D om. *kiṃcid api*. **9** T *tyajaṃtasvāmi*, K *tyajantasvāmi*, O *tyajann evāsmi*. **10** h *labhate hy ānu*°; T K *anujīvinaḥ*. **11** M *yad* statt *yathā*.

---

a) parijaneṣu madhye paramāṇor atyalpān matto 'pi (**a**).

b) naṣṭadhairyaḥ (**a** $\mathbf{m_2}$). Frei (oder mißverständlich?) übersetzt **Gl**:

„Dein Pfeil, wenn er nur leicht berührt die Maid,
Erweckt in ihr Verwirrung und Verlangen;
Auch Çiva selbst, voll inn'rer Seligkeit
Blickt freuderfüllt die Bergestochter an."

c) priyatamān prāṇebhyo 'pi priyatamān dāraprabhṛtīn api. yad vā priyatamān iti prāṇaviśeṣaṇam (**a**).

d) anuṣaṅginaḥ parakārye prayatamānāḥ praśastodyamavanta ity arthaḥ (**a**).

अस्तु[1] स्वस्त्ययनं तवाद्य[a)] मरुतां सत्याशिषामाशिष-
स्त्वां रक्षन्तु यशश्च ते सुविपुलं[2] लोकत्रये दीव्यतु।
शौर्यं त्वद्भुजयोरिदं[b)] च [3]भवतात्पुङ्खानुपुङ्खोदयं[c)]
किंचोद्योगमिमं[4] समर्थयतु नः
स्वच्छन्दचेष्टो विधिः[5] ॥ १७ ॥

कामो[6] रतिवसन्ताभ्यां सह[7] शङ्कमानो निष्क्रान्तः।

महेन्द्रः। गुरो विरिञ्च्यादेशानुरूपमस्माभिरेतावदनुष्ठितम्[8]। कार्यसिद्धौ भगवती नियतिरेव प्रभवति[9]।

बृहस्पतिः। एवमेतत्[10]।

महेन्द्रः[11]। स्थाण्वाश्रमसमीपं[12] प्रतिगच्छतः कामस्य पश्चाद्वृत्तान्तज्ञानाय कंचन[13] प्रेषयितुमुद्युञ्जे[14]।

बृहस्पतिः। अहमपि प्रस्तुतकार्यसिद्धये[15] कुलदेवताः[16] प्रार्थयितुं गमिष्यामि। इति निष्क्रान्ताः सर्वे॥

इति द्वितीयोऽङ्कः॥

---

1 D *asti.* 2 t O g *'stu* statt *su*; K *suvigunam.* 3 T *bhavatā*; D *puṅkhādapuṅ°*; K *°puṅkho 'yam.* 4 D O *kiṃcidyogam*, R B *kiṃvodyogam.* 5 K *svaścanda°*; D *°caṣṭā*, M d g *°ceṣṭāvidhiḥ.* 6 om. B. 7 M om. *saha.* 8 T K h D *Viriṃcā°*, H *Viraṃcā°*; t O a g m$_2$ *°deśād anu°*; H R t B M a g m$_2$ *eva tāvad*, O *evaṃ tāvad.* 9 D O om. *kārya*; D *siddhir*; T R B *bhagavati*, h *bhavati*; D *niyatam*; M g a m$_2$ *bhavitavyataiva*; h *prabhavatī.* 10 t O g om. *evam—udyuñje.* 11 om. T. 12 k *Sthāṇvāśramam*; T *Sthāṇvāśramam prati gamaṃ samīpaṃ prati.* 13 T *kamca.* 14 T *preṣitam*, K H R *preṣitum*; T H h *udyuṃkṣe*, K *udyuṃgṣe*, R B *udyuṃkte.* 15 R B *prasiddhaye.* 16 K T M *°devatāṃ.*

---

a) tavāyanaṃ mārgaḥ adya svasty astu śubham astu (**a**). — svastyayanaṃ śubhaprāptiḥ (**m**$_2$).

b) idam iti hastanirdeśaḥ (**a**).

c) ekasya puṅkhasya anu paścād anyasya puṅkhasya udayaḥ prādurbhāvaḥ yasmin karmaṇi tad yathā bhavati tathā puṅkhānupuṅkhodayam uttarottaram (**a**, fast genau so **m**$_2$). —

„Es mögen Macht entwickeln deine Arme
Und jede Pfeilenspitze [!!] . . .“ (**Gl**).

ततः प्रविशति महेन्द्रो बृहस्पतिश्च ।

महेन्द्रः । गुरो किं नाम कामः केनापि बाणसंधानेन खण्डपरशुं वशीकुर्यात् । आहोस्वित्संवर्तसमयदिनकरदुष्प्रेक्ष्यं[1] मुनिमीक्षितुमशक्नुवन्निवर्तेत[2] । अथ वा [3]कोपान्धकारितचेतसामुना[a)] भालनयनपावकस्य[4] पुरोडाशतां नीयेत[5] । कथं भविष्यतीति न जाने । [6]वामाक्षिस्पन्दनं[b)] सूचयित्वा साशङ्कम् ।

अदक्षिणमिदं[7] चक्षुः स्फुरितैः शंसतीव मे ।
देवकार्यविघाताय जाग्रतो वामतां विधेः ॥ १ ॥

बृहस्पतिः । प्रतिहतममङ्गलम्[8] । मघवन्[9] । अनेन निमित्तेन ज्ञाप्यते वृत्तान्तज्ञेन केनचिदागन्तव्यमिति ।

ततः प्रविशति नारदः ।

नारदः । मघवदादेशेन[10] स्थाण्वाश्रमं गत्वा तत्रत्यमुदन्तं विज्ञाय समागतो ऽस्मि । तदेनमुपसृत्य निवेदयिष्यामि[11] तत्रत्यमखिलमुदन्तम्[12] । इति परिक्रामति[13] ।

महेन्द्रः[14] । विलोक्य । अयमेव महतीवल्लभो[c)] मुनिरुपसर्पति । तदासनमुपनीयताम् ।

---

1 hRB *aho*; K *āhosyat*; DO om. *samaya*; khRB °*duṣprekṣam*, T °*duḥsprekṣaṇam*, H °*prekṣa*, DO °*prekṣitam*; M °*duṣprekṣamukham nir*°. 2 TK *amuṃ nirīkṣitum*. 3 kHhRtMBagm$_2$ °*kāri*°, TDO °*kāra*°, K °*kari*°; k °*cetasātmano*, tagm$_2$ °*cetasātmānam*, RB °*cetasā*. 4 Alle außer kDtOg *phāla*°; M °*nayanasya*. 5 h *nīyata*, D *nīyate*. 6 RB °*kṣasya kampanaṃ*. 7 RB *ādakṣiṇam*; M *imaṃ*. 8 T *hatam*; TKHh wiederholt. 9 DtagM *bhagavan(n)*. 10 DO *Maghavādeśena*. 11 K °*dayāmi*. 12 M om. *akhilam*. 13 h *pariṣkrāmati*. 14 tg add. *añjaliṃ baddhvā*.

---

a) „Read *kopāndhīkṛtacetasā* for *kopāndhakāricetasā*“ (**a**). kopena andhakāri tamoyuktaṃ yat cetaḥ manaḥ tena (**m**$_2$).

b) vāmākṣispandanaṃ puṃsām aśubhaśaṃsīti naimittikāḥ (**a**).

c) Vgl. Anm. a, Seite 4.

बृहस्पतिरासनमुपनयति । नारद उपविशति ।

महेन्द्रः । अञ्जलिं बद्ध्वा । भगवन् । कथय भद्रमभद्रं वा[1] दिविषदामभिलषितम् ।

नारदः । सर्वमादितः प्रभृति कथयामि । श्रूयताम् ।

महेन्द्रः । अवहितो ऽस्मि ।

नारदः । तथा[2] देवकार्याय प्रस्थितं कन्दर्पं तिरस्करिण्या विद्यया[a] छन्नस्तत्रत्यवृत्तान्तजिज्ञासयाहं[3] त्वन्निदेशाद्न्वसरम्[4] ।

महेन्द्रः । ततस्ततः

नारदः । तत्र स्थाण्वाश्रमसमीपमासाद्य कामो वसन्तमभिहितवान् ।

महेन्द्रः । कथमिति ।

नारदः । सखे । त्वयास्मिन्हिमवदुपकण्ठकानने[5] विजृम्भितव्यमिति ।

महेन्द्रः । ततः[6] स किं कृतवान् ।

नारदः ।

वाचालयन्नथ[b] कुलानि वनप्रियाणा-[c]
मङ्कूरयन्मलयमारुतकन्दलानि[d] ।

1 RB *vā hi.* 2 RB om. *tathā.* 3 DO *prachanno*; Mtagm$_2$ om. *channas*; alle außer ktg om. *tatratya*; THhDRO BM om. *ahaṃ.* 4 M *tvadādeśād*; T *sanni°*; DO *acaram*, RB *avasaram*, t *avacaram*, O *acaram*, aM *anusaram*, g *anvacaram.* 5 T *Himavata upa°.* 6 tgM om. *tataḥ.*

a) antardhānavidyayā (**a m$_2$**).

b) vasantasamaya eva kokilānām atimadhuranādasampattir iti prasiddham etat (**a**).

c) kokilānām (**a**).

d) kandalāni navāṅkurāṇi [**m$_2$** navāṅkurān]. „The Malaya breeze is compared here to a young plant the sprouts of which, the advent of spring causes to shoot out“ (**a**).

सख्युः प्रसूनविशिखस्य भुजावलेपं[a)]
संवर्धयन्मधुरजृम्भत[1] काननेषु ॥ २ ॥

महेन्द्रः । ततस्ततः ।

नारदः ।

दत्तं प्रियाभिर्बहुमानपूर्व-
मास्वाद्य[2] चूतासवमन्यपुष्टाः[3] ।
आमोदिभिः पञ्चमरागभेदैः[4]
[5]प्राबोधयन्पञ्चशरावलेपम्[b)] ॥ ३ ॥

महेन्द्रः । ततस्ततः ।

नारदः ।

आधूय[c)] [6]चन्दनतरूनुत्तमनद्यास्तरङ्गमालिङ्ग्य[d)] ।
आदाय[e)] कमलसौरभमङ्कुरितो मलयशैलपवमानः[7] ॥४॥

महेन्द्रः । ततस्ततः ।

नारदः ।

चूताः[8] कोरकिता विहाय[9] सुदृशां हस्ताम्बुजामर्शनं[10]
तत्पादाम्बुजताडनैरपि विना कङ्केलयः[f)] पुष्पिताः ।

---

1 D °*vartayan*; TR °*jṛmbhita*. **2** RtBagMm₂ *āsādya*. **3** RB *cyūtā*°; MTKO °*puṣṭaḥ*, D °*pṛṣṭhaḥ*, RB °*pṛṣṭaḥ*. **4** K °*bhedhaiḥ*. **5** K *prābho*°, RB *pra*°; DO °*yat*. **6** T *ālihya*. **7** hRB °*śailajaḥ pavanaḥ*. **8** RB *cyū*°. **9** tg *vināpi*. **10** tg °*marśanāt*.

---

a) vasantasamaya eva kokilamadhuradhvanimalayamārutādilakṣaṇoddīpanavibhāvanasamṛddhir iti Vātsyāyanatantrādiṣu [??] suprasiddham (**a**).

b) Wir wollen mit **Gl** nicht rechten, daß er das Imperfektum von „erwecken" hier „erwachten" bildet. („Die Kokilas . . . erwachten des Liebesgottes Stolz und Selbstbewußtsein".)

c) anena vātasya saurabhyam uktam (**a m₂**).

d) uttamanadyāḥ svacchatoyam āvahantyās saritas taraṅgaṃ vīcim āliṅgya (**a**). anena śaityam uktam (**a m₂**). **H** Tāmraparṇyāḥ am Rande.

e) anena māndyaṃ saurabhyaṃ coktam (**a m₂**).

f) aśokavṛkṣāḥ (**a m₂**).

[1]तत्संगीतकमन्तरेण[a)] [2]हसिता[b)] रम्याः [3]प्रियालद्रुमा[c)]
मुक्ता[4] तद्वदनासवं[5] मुकुलिता गन्धोत्तराः[6][d)] केसराः ॥५॥

महेन्द्रः । ततस्ततः ।

नारदः ।

आदाय [7]चापमधिरोपितषद्वदज्यं[e)]
तस्मिन्हिमाचलमुपेयुषि[8] पञ्चबाणे ।

---

1 O *satsaṃgītakam*; T *uttareṇa.* **2** B *haritā*, M *sahitā.* **3** Alle außer tkg *priyālu°.* **4** RB *muktās.* **5** R *°vacanā°.* **6** K *°māḥ*, R *bāndhottarāḥ.* **7** R *°padajjaṃ*, M *°padantyaṃ*; B *ṣadvadajjaṃ.* **8** OM *Himālayam* (M korr. in *Himācalam*).

---

a) tāsāṃ saṃgītakaṃ tannāma kāryatrayam. tad uktam: nṛttaṃ gītaṃ tathā vādyaṃ trayaṃ saṃgītakaṃ smṛtam iti Saṃgītaratnākare (**a**).

b) vikasitāḥ (**a**). Da die Farbe des Lachens in Indien weiß ist, so folgt daraus, daß die priyāla-Bäume weiß blühen.

c) vṛkṣaviśeṣāḥ (**a**), rājādanavṛkṣāḥ (**m**$_2$). Nach dem pw Buchanania latifolia. Die Blüten dieses Baumes sind übrigens nicht rein weiß, sondern „of a whitish green“, Roxburgh, Flora Indica II, 385.

d) gandhaḥ uttare uttarakāle yeṣāṃ te gandhottarāḥ āmardasurabhiṇaḥ, **am**$_2$. The more the vakula [= kesara] flowers are used the more fragrant they become (**a**). — Der in Strophe 6 ausgeführte Gedanke, daß gewisse Bäume der Beihilfe schöner Frauen bedürfen, um ihre Knospen zur Entfaltung bringen zu können, begegnet in der indischen Lyrik des öfteren. Zu dem, was ich darüber in Beiträge zur Flora Sanskritica II [ZDMG. Bd. 65, 729 f.] gesagt habe, liefert A i y a r eine willkommene Ergänzung mit der Strophe:

strīṇāṃ sparśāt priyaṅgur vikasati, bakulaḥ sīdhugaṇḍūṣasekāt,
pādāghātād aśokas, tilakakurabakau vīkṣaṇāliṅganābhyām;
mandāro narmavākyāt, paṭumṛduhasanāc campako, vaktravātāc
cūto, gītān namerur, vikasati ca puro nartanāt karṇikāraḥ.

Dieselbe Strophe hat auch **k** p. 32 mit den Varianten a: vilasati und vakulaś śīdhu°, und **m**$_2$.

e) „Und als der Liebesgott den Bogen nahm,
Auf den sich eine Menge Blumen setzte“ **Gl.**

Blumen wohl nur Druckfehler für *Bienen.*

वेलातिलङ्घि किमपि[a)] प्रणयातिरेका-[1]
द्वन्द्वानि लौल्यमभजन्त[2] विमोहितानि ॥ ६ ॥

महेन्द्रः । ततस्ततः ।

नारदः । किं बहुना ।

तस्मिन्वने निवसतामनुतटमतिलङ्घ्य[3] धैर्यमर्यादाम् ।
अबलासु निर्ममानामासीदनुरागसिन्धुरुद्वेलः[4] ॥७॥

महेन्द्रः । एवं सकलजनविकारकारिणि तस्मिन्प्रवृत्ते[5] किं कृतवान्कामः[6] ।

नारदः । स कामो रत्या वसन्तेन चान्वीयमानो महति [7]देवदारुद्रुमखण्डमण्डपे[b)] तारक्षवचर्मनिर्मितास्तरणायामहिमकरशिलावेदिकायामासीनमन्तर्मुखनिहितचित्तवृत्तिमभ्यन्तरपवननिरोधनिश्चलाननं[8] नासाग्रनि-

---

1 K *pralayā°*. 2 O *loyam abha°*. 3 R B *°tām munikulam*, M T K H h D O a m_2 *anukalam*; k t g *ullaṅghya*. 4 g *nimnagānām*; D t a g M m_2 *atirāga°*; T K H h R B M *ativelaḥ*. 5 T H h M R B *°janavikāriṇi*, K *°kāraṇe*, D O *°janavisāriṇi*; T H h D R O B M om. *tasmin*, K om. *tasmin pravṛtte*; O *prakṛte*; T K add. *samaye* hinter *pravṛtte*. 6 K *sa Kāmaḥ*; R B *Kā° kiṃ kṛ°*. Danach Lücke in M bis *tato bhagavān*. 7 D *daiva°*; R B om. *dāru*; k D t a g om. *druma*; T K H h O *°ṣaṇḍa°* (*°ṣaṃḍa°*); D R B om. *khaṇḍa*; K O m_2 *°maṇṭape*. 8 k t a g m_2 *tarakṣu°*, T *tārkṣyava°*,

---

a) *kim api* [mit *laulyam* zu verbinden!] hier im Sinne von anirvacanīyam, „unbeschreiblich".

b) devadārūṇāṃ śakrapādapānāṃ khaṇḍaiḥ śakalair nirmito maṇḍapaḥ janāśrayas tasmin, **a** $\mathbf{m}_2$.

c) tarakṣus tannāmavyāghraviśeṣaḥ; tarakṣu is a species of tiger called the hunting leopard; hyena (**a**); tarakṣos vyāghraviśeṣasya, $\mathbf{m}_2$; „mit Hyänenfellen bedeckt" **Gl**.

d) ahimaśilāvedikāyāṃ sūryopalanirmitopaveśasthāne (**a**).

e) antarmukhaṃ hṛdi nihitā vyavasthāpitā cittavṛttir manovyāpāraḥ yasya tam (**a**).

f) abhyantarapavanānām antaścarāṇāṃ marutāṃ prāṇādī-

हितपक्ष्माण्यक्षीणि[1] धारयन्तमपरमिव[2] निस्तरङ्गमम्बुधिं तमिन्दुशेखरमपश्यत्[3] ।

महेन्द्रः । ततस्ततः ।

नारदः । ततो[4] भगवानपि[5] नीललोहितः [6]प्रतीचा विलोचनेन[a)] प्रत्यञ्चमात्मानमपरोक्षीकृत्य[7] [8]शिथिलितपर्यङ्कबन्धः[b)] प्रणिधानाद्व्यरंसीत्[9] ।

महेन्द्रः । ततस्ततः ।

नारदः । ततः[10] स कामस्तद्दर्शनेन [11]करतलविस्रस्तकार्मुकः[c)] कर्तव्यमपरमजानन्क्षणमालिखित[12] इव भयादतिष्ठत् ।

---

h *tārakākṣava°*, D *nārakṣa°*, RB *śārdūlāsura°*; k *°carmavarmitāyām*, RB *°carmaṇi nistīrṇāyām*, tagm$_2$ *°carmanirmitāyām*; alle außer m$_2$ om. *kara*; kKTDROB *hima°*; D *°śaila°*; DO *°pada°* statt *°pavana°*.

1 h *nāsāgrahita°*. **2** K *apara iva.* **3** TK *tapasyantam* statt *tam.* **4** B om. *tato.* **5** K om. *api.* **6** h *pratīcyā.* **7** RtOBg *valokanena*, M *vilokanena*; D *°na parokṣī°*. **8** hRB *śithila°*; TKHhDROBM *°bandhanaḥ.* **9** K *viraṃsīt*, Hh *yaraṃsīt.* **10** Ktagm$_2$ om. *tataḥ.* **11** Alle außer K *°vidhṛta°*. **12** RB *alakṣita iva.*

---

nām . . . (**a**). Ähnlich **m$_2$**.

prāṇo 'pānaḥ samānaś codānavyānau ca vāyavaḥ.
hṛdi prāṇo, gude 'pānaḥ, samāno nābhisaṃsthitaḥ;
udānaḥ kaṇṭhadeśastho, vyānaḥ sarvaśarīragaḥ (**a**).

a) **a** „by the internal eye“; **Gl** „durch seinen alles durchdringenden Blick“.

b) **k** paryaṅkabandhaḥ = vīrāsanam.

ekaṃ pādam athaikasmin vinyasyorau tu saṃsthitam,
itarasmiṃs tathā cānyaṃ vīrāsanam udāhṛtam

iti Vasiṣṭhaḥ. Diese Strophe bei **am$_2$** und **k**; **am$_2$** lesen itarasmiṃs tathaivoruṃ.

c) „It would perhaps be better to read *karatalavigalitakārmukaḥ* . . . as it would be more natural to the occasion, for Kama becomes terrified at the m e r e sight of Siva; and as Kalidasa, whom Bana so closely copies, has expressed to the latter effect. Kum. III, 51.“ (**a**)

महेन्द्रः । ततस्ततः ।

नारदः ।

अत्रान्तरे हरमुपासितुमभ्ययासी-
[1]द्वासन्तिकाप्रसवकल्पितमण्डनश्रीः[a)] ।
[2]शृङ्गारवीरतपसामधिदेवतेव[b)]
साकं सखीभिरवनीधरराजकन्या ॥ ८ ॥

महेन्द्रः । ततस्ततः ।

नारदः । ततः स कामो लब्धावलम्ब[3] इव समाश्वस्य दृष्टिप्रतीपपरिहारेण[4] पाश्चात्यं भागमाश्रित्य[5] समयं प्रतीक्ष्य स्थितवान् ।

महेन्द्रः । ततस्ततः ।

नारदः । पार्वती च सुखोपविष्टमष्टमूर्तिमष्टाङ्ग[c)]स्पृष्टभूमिरवन्दिष्ट[6] ।

---

1 THDtagMm_2 *vāsantika°*. 2 RB Lücke bei *vīra*. 3 t *labdhālamba*. 4 m_2 *dṛṣṭipāta°*; k *°pradīpa°*; HhR *°prahāreṇa*; D om. *pari*; tO *°vihāreṇa*, Bg *°pravihāreṇa*. 5 KDt agm_2 *pāścātya*, M *paścātyā*, O *pārśvatya*; T *āsṛtya*. 6 K om. *aṣṭamūrtim*.

---

a) vāsantikāprasavaḥ = mālatīkusumam. vāsantikaprasaveti pāṭhāntaram (**k**). — prasavāḥ puṣpāṇi teṣu kalpitā racitā maṇḍanaśrīḥ alaṅkāraśobhā yayā sā. anena svabhāvatas sundarīṇāṃ nābharaṇādikaṃ kām api śobhām āvahati, pratyuta ābharaṇānām evāvahati śobhā saundaryam . . . anena naisargikasaundaryātiśayo vyajyate. — vāsantikaprasavaiḥ kalpitā maṇḍanaśrīḥ yasyāḥ seti vā vigrahaḥ. vanacarīṇāṃ yuvatīnāṃ vāsantikakusumair evālaṅkaraṇaṃ svābhāvikaṃ hi (**a**).

b) „like the supreme goddess come to confer boons, or to vouchsafe success to the penances of the hero of love affairs. But śṛṅgāra° may also be taken to mean ‚like the presiding deity of love, heroism and penance‘, which however does not appear to suit so well to the context“ (**a**). — „Wie herrschend über Liebe, Kraft und Buße“ **Gl**.

c) jānubhyāṃ ca tathā padbhyāṃ pāṇibhyām urasā dhiyā
śirasā vacasā dṛṣṭyā praṇāmo 'ṣṭāṅga īritaḥ (**a** m_2).

महेन्द्रः । ततस्ततः ।

नारदः । अनुरूपरमणमासादयेति[1] तामाशिषावर्धयदर्धचन्द्रमौलिः[2] ।

महेन्द्रः । ततस्ततः ।

नारदः । ततः क्षणे[3] तस्मिन्नयमेवावसर इति स[4] कामः कार्मुके समाधत्त[5] संमोहनं बाणम् ।

महेन्द्रः । ततस्ततः ।

नारदः ।

तदनु युगपदीशः पार्वतीवक्त्रपद्मे
स्मितविकसितगण्डे प्राहिणोल्लोचनानि ।

महेन्द्रः । ततस्ततः[6] ।

नारदः ।

पुलकिततनुरन्तर्भावमावेदयन्ती
दरनमितमुखेन्दुः[7] सा च सव्रीडमस्थात्[8] ॥ ९ ॥

महेन्द्रः । ततस्ततः[9] ।

नारदः । ततो भगवानन्तःकरणविक्रियां[10] तपोबलेन संयम्य[a)] तत्कारणाय[11] विष्वग्विलोचनानि[12] व्यापारितवान् ।

महेन्द्रः । ततस्ततः ।

---

1 kH *anurūpaṃ*; RB *varam* st. *ramaṇam*. 2 D *āśiṣo*; M °*vāvardha Candra*°. 3 K om. *tataḥ*; H *tatkṣaṇe*. 4 RB *iti prasādayati*; alle außer ktag om. *sa*. 5 kTKHM *samadhatta*, D *saṃdhāya*, O *samādhāya*. 6 aMm₂ om. *Ma*° *ta*°. 7 tagm₂ *daramudita*°. 8 O *sācīsam asthāt*; TK *āsthāt*. 9 aM om. *Ma*° *ta*°. 10 TROB °*vikriyaṃ*, D *antaḥkaraṇam*. 11 K *tatkaraṇāya*. 12 B *locanāni*.

---

a) **Gl**: „Nachdem der Ehrwürdige die Veränderung ihres [!] Herzens durch die Kraft der Buße bemerkt [!] hatte“.

नारदः[1] ।

आराद्पश्यदधिसंहितमोहनास्त्रं[2]
कर्णावतंसपदकल्पितकार्मुकज्यम्[3] ।
[4]आकुञ्चितैकपदमञ्चितपूर्वकायं[a)]
लक्ष्यीकृतात्मवपुषं[5] मदनं महेशः ॥ १० ॥

महेन्द्रः । सभयम् । अवशिष्टं च[6] कथ्यताम् ।

नारदः । तदनु प्रकुपितस्य[7] शूलिनो भाललोचनादुदजृम्भत ज्वालावलीजटालो[8] लोकग्रासलालस[9] इव [10]कालानलो[b)] वह्निः ।

महेन्द्रः । सनिर्वेदम् । किमतः[11] परं निवेद्यते ।

नारदः । तेन पुरारेर्नयनानलेन मदनः[12] शलभतां [13]नीतः ।

महेन्द्रो मूर्छति । नारदः समाश्वासयति ।

महेन्द्रः । आश्वस्य[14] । हा भुवनरमणीय पुष्पबाण सकलजनानन्दन पुरंदरस्यार्थे त्यक्तजीवितो ऽसि ।

---

1 K add. *tataḥ.* 2 K *adha°*, T *atha saṃdhita°.* 3 KD *pari* statt *pada.* 4 h *°kāryaṃ*; D *uccalitānyakāyaṃ*, O *ucchritanaidhakāyaṃ.* 5 kt *lakṣyī°*, D *lakṣmī°.* 6 om. MDRB. 7 DRB om. *pra.* 8 M hat Lücke von *bhāla°* bis *tena.* Alle außer ktg *phāla°*; TKhRB *ujjṛmbhita*, DOg *ujjṛmbhaj*, ta *udajṛmbhaj*; D *°jaṭilo.* 9 *loka* nur O. 10 K *°nilo.* 11 K *itaḥ.* 12 TKHhRB *tena Ma° Pu° lalāṭanayanena*, D *tena Ma° lalāṭajena*, O *tena Ma° Pu° lalāṭanayanajena*, M *lalāṭanayanena śala°.* 13 tg *puroḍāśatāṃ.* 14 THhO *āśvāsya.*

---

a) ākuñcitam ābhugnam ekapadaṃ savyapādo yasya tam. ālīḍhākhyasthānake sthitam ity arthaḥ . . . ālīḍhalakṣaṇaṃ tūktaṃ Yādavena:

sthānāni dhanvināṃ pañca tatra vaiśākham astriyām
vitasty antaragau pādau maṇḍalaṃ toraṇākṛtī;
samānau syāt samapadam, ālīḍhaṃ padam agrataḥ
dakṣiṇaṃ vāmam ākuñcya pratyālīḍhaṃ viparyayaḥ (**a m**$_2$).

[añcitapūrvakāyaṃ] bāṇasaṃdhānārtham iti śeṣaḥ (**a**).

b) sakalalokakabalīkaraṇe lālaso lolupaḥ. kālānalaḥ pralayakālodbhūtāgnir ivodajṛmbhat niścakrāma (**a**). Ganz ähnlich **m**$_2$.

बृहस्पतिः । मघवन्[1] । मा विषीद् । भवितव्यता हि बलवती[2] । तदास्ताम् ।

महेन्द्रः[3] । रतिः किं कृतवती ।

नारदः । रतिरपि मोहं प्राप्ता ।

महेन्द्रः । किं कृतवान्वसन्तः ।

नारदः । मोहं प्राप्तः सखा वसन्तो ऽपि ।

महेन्द्रः । मूर्छितौ[4] रतिवसन्तौ किमन्वतिष्ठताम्[5] ।

नारदः । प्रथमाश्वस्तेन[6] मधुना कथं कथंचित्संज्ञां[7] लम्भिता[8] रतिः[9] पुरतः[10] परुषपवनविकीर्यमाणपांसुपटलं[11] भसितमयं[12] पुरुषाकृति[13] पत्युरङ्गमालिङ्ग्य

गुरुतरशोकोपहता[14] कुररीव[a)] प्रियवियोगमापन्ना ।
आक्रन्ददार्तनादं[15] बाष्पस्नपितोन्नतस्तनी[16] बाला ॥ ११ ॥

महेन्द्रः । ततस्ततः ।

नारदः । तदनु हा नाथेति बहु[17] विलपन्तीं रतिमाश्वासयदाकाशसंभवा[18] वाणी[19] यथा ।

मुञ्च शोकमिह[20] कामवल्लभे[21]
लङ्घ्यते[22] जगति केन[23] कल्पना[24] ।

---

1 m₂tagM *bhagavan*. **2** T add. *balavati*, K *Mahendraḥ*. **3** kTKhDO om. **4** K *mūrchāto*; om. *Rati°*. **5** HhDRO BgM *anuti°*. **6** T *°sthena*, h *prathamā āśvastena*, Dt *prathamam āśvāsya tena*, RB *prathamāśvastastena*, am₂ *prathamam āśvastena*. **7** kDtagm₂ om. *katham*; TD *saṃjñā*. **8** ThO *labhitā*. **9** Dtam₂ *Ratir api*. **10** DtO *punaḥ*. **11** T *puruṣa°*; t om. *vi*; RB *°māṇā°*; H *°paṭala*. **12** D *°maya*. **13** Alle außer ktOgm₂ *°kṛtiṃ*. **14** T *śokābahalā*, HDRtOBam₂ *śokā°*. **15** K *krandaṃd ārta°*; aMm₂ *°nādā*. **16** T *bāṣpavisṛtonna°*, K *bāṣpasravitonna°*, R *°srastonna°*, B *°snatonna°*. **17** DO om. *bahu*. **18** tg om. *sambhavā*. **19** T add. *āśvāsayām āsa*. **20** k *ayi* st. *iha*. **21** D *vallabhālabhe*, O *vallabhālake*. **22** THRB *laṃghite*. **23** h *kaṃcana* st. *kena*. **24** D *kalpyatā*.

---

a) **a** „female osprey“; **Gl** „Kibitzweibchen“ [so!].

उद्भविष्यति[1] पुनश्च ते[2] पतिः
पार्वतीपरिणये पिनाकिनः[3] ॥ १२ ॥

इति ।

महेन्द्रः । समाश्वस्य[4] सहर्षमिव ।

भग्नो मनोरथो मे पुनरङ्कुरितुं[5] किलायमुद्युङ्क्ते[6] ।
दावाग्निलीढशेषस्तरुरिव[7] धाराधरेण संसिक्तः ॥ १३ ॥

बृहस्पतिः । मघवन्[8] । सत्यैव[9] वैहायसी वाणी । सर्वथा[10] कामः पुनरुद्भविष्यति[11] ।

महेन्द्रः । ततस्ततः ।

नारदः । ततः[12] कथंचित्प्रत्याश्वस्ता[13] रतिर्नीता[14] समानदुःखेन[15] मधुना निजं[16] भवनम् ।

महेन्द्रः[17] । कामं[18] कथावशेषं[19] कृत्वा कालकण्ठः[20] किमकरोत् ।

नारदः[21] । स्त्रीसंनिकर्षपरिजिहीर्षया[22] सह भूतगणेन[23] भूतपतिरन्तर्धानमकरोत् ।

महेन्द्रः । किं कृतवती पार्वती ।

नारदः ।

आगत्य[24] दोर्भ्यामादाय मूर्छामुकुलितेक्षणा ।
नीता नितान्तवात्सल्याद्गौरी हिमवता गृहम् ॥ १४ ॥

---

1 M *utpatiṣyati.* 2 RB *ca te punaḥ.* 3 M *Pinākinā.* 4 ThD °*śvāsya.* 5 D *aṃkuratāṃ*, tM *aṅkuritaṃ.* 6 K *udyutke*, O *udyuṃte.* 7 K *bhavāgni*°. 8 M *bhagavan.* 9 k *satyam eva*, O *satyeva.* 10 k *sarvadā.* 11 RB °*tīti.* 12 om. ktagm$_2$. 13 D *kiṃcit.* 14 Alle außer DO add. *sā.* 15 t$_2$ *samāduḥkhena.* 16 MBam$_2$ *nija.* 17 om. T. 18 T *kathaṃ*; K *tataḥ Kāmaṃ.* 19 TK °*vaśeṣīkṛtya.* 20 B *Kala*°, O °*kaṃṭakaḥ.* 21 om. T. 22 ta °*karṣaṃ pari*°. 23 om. K. 24 T *āgamya.*

महेन्द्रः । भगवन्नारद श्रुतं श्रोतव्यम् । किमतः[1] परं प्रतिपद्यसे[2] ।

नारदः[3] । पुनरिमं[4] वृत्तान्तं सत्यलोकवर्तिने[a)] चतुर्मुखाय निवेदयितुं गमिष्यामि[5] । इति निष्क्रान्तः ।

ततः प्रविशति रम्भा ।

रम्भा । कुबेरभवणादो णिवट्टमाणाए[6] ओसहिप्पत्थणअरे जो मए आअण्णिदो[7] वुत्तन्तो[8] तं सामिणो विण्णवेमि । इति परिक्रामति ।

महेन्द्रः[9] । विलोक्य ।

संचारिणीव[b)] वल्ली विद्युल्लतिकेव चापलोन्मुक्ता[10] ।
मोहनकलेव मूर्ता[11] कास्विदियं कमलपत्त्राक्षी ॥ १५ ॥

निरूप्य । रम्भा खल्वियम् ।

रम्भा[12] । उपसृत्य । जअदु जअदु[13] भट्टा ।

महेन्द्रः । रम्भे कुत आगम्यते भवत्या ।

रम्भा । कुबेरभवणादो ।

महेन्द्रः । किमस्ति तत्रापूर्वो वृत्तान्तः ।

रम्भा । णीलल्लोहिदस्स[14] णिडालग्गिकीलजालेण[c)] कधा-

1 T *itaḥ.* 2 HDR °*te.* 3 K *ahaṃ.* 4 D *imaṃ ca.* 5 a M m_2 *nivedayiṣyāmi.* 6 K *nivvaṭṭa*°, h *ṇivvaṭṭa*°. 7 k t a g M m_2 *ākaṇṇido.* 8 K *uttando.* h R O B *uttaṃto.* 9 B *Maghavā.* 10 t M m_2 *cāpalānmuktā.* 11 D *mūrtiḥ.* 12 h om. *Rambhā — vṛttāntaḥ.* 13 T *jayadu bhaṭṭā*; alle anderen *jedu*, K O M nur einmal. 14 K h R B *Nīla*°; k t a *ṇiḍilaggi*°, K *ṇiṭilajñi*°, T B *niḍālaggi*°, H *ṇidalaggi*°, O *ṇṇidalaggi*°, a m_2 *ṇiḍilāṇalajālena*, M *ṇiḍālāṇalajjālena*; TRB °*kila*°, H °*kīlā*°, t g °*kāla*°, O °*laggijjālajāveṇa.*

a) satyaloka ist die oberste der sieben Welten und der Sitz Brahman's.

b) **Gl** „wie eine sich anschmiegende Liane". *saṃcāriṇī* ist natürlich = „wandelnd" und bedeutet ungefähr dasselbe wie *mūrtā* in der nächsten Zeile.

c) **k** kīlajālena = jvālāsamūhena.

वसेसिदो[1] कामो त्ति सव्वो[2] भणदि । अण्णं च[3] किं पि[4]
ओसहिप्पत्थणाअरे ।

महेन्द्रः । किं तदन्यत् ।

रम्भा । मम्मधदाहेण[5] भग्गमणोरधा परमेसरं[6] जेव्व[7] पदिं[8]
अहिलसन्ती[9] पव्वदी[10] कढिणेहिं तवच्चरणेहिं अत्तणो[11]
अहिलासं पूरिदुं ईहदि त्ति[12] ।

महेन्द्रः । किमुक्तमस्मिन्नर्थे मातापितृभ्याम् ।

रम्भा । मेणाए देवीए[13] एव्वं भणिदं ।

महेन्द्रः । किमिति ।

रम्भा ।

परुसो तवोविसेसो[14] तुह[15]
उण अङ्गं[16] सिरीससुउमारं ।
ववसिअमेअं[17] कढिणं[18] प-
व्वइ ता दुक्करं ति[19] पडिभाइ ॥ १६ ॥

महेन्द्रः । किमुक्तं हिमवता ।

---

1 K *kaha°*, alle anderen *kahā°*; T H R B M (*kahā*)*sesio*, O *kāhā-sesio*. 2 ThRB *savvaha*, K *savvaḥ*, O *savo*, H *savvehiṃ*: ktO Bagm$_2$ *bhaṇaï*, T *bhaṇīti*, Kh *bhaṇanti*, H *bhaṇiti*, R *bhaṇati*, M *bhaṇādi*. 3 THaMm$_2$ *aṇṇaṃ a*, K *aṇṇayya*, R *āṇṇi kiṃ°*, B *aṇṇi ca*, tg *aṇṇacca*. 4 K *vī*, alle anderen außer O *vi*. 5 T *Caṃmahi°*, alle anderen *Mammaha°*. 6 ktag *Paramessa-raṃ*, M *paramesuraṃ*, T *°sarī*. 7 TKHhO om. *jevva*, RB om. *jevva padiṃ*. 8 kHhtagMm$_2$ *païṃ*, TO *pahiṃ*, K *payiṃ*. 9 kKhtagMm$_2$ *°sandī* (*°saṃdī*), T *°saṃti*. 10 ktagMm$_2$ *Pavvaī* hinter *°maṇoradhā*; T *Pavvaṃka*, KHhO *Pavvaī*, RB *Pavvaï*. 11 Alle außer ktag *appaṇo*. 12 ktagm$_2$ *issadi tti*, MTK *īhaï tti*, RB *īhaï iti*, H *ī°haï tti*, h *i°haï tti*, O *īihatī*. 13 M *Meṇae*, ktagm$_2$ *Meṇaādevīe*, K *Meṇayāye devīye*, O *Me° devieva*. 14 RB *tavā°*. 15 TRB *taha*. 16 kTKtg *aggaṃ*. 17 K om. *vavasiam*; ktagm$_2$ *vivasidam*, THhRB *vavasidam*, M *vavasidaṃ*, O *vvavasidam* (*kva°?*); alle *edaṃ*. 18 ktOg *kahiṇaṃ*, TRBMam$_2$ *kaṭhiṇaṃ*, K *kaṭiṇaṃ*. 19 Alle außer TM *tti* (h *di*); M *paḍihāï*.

रम्भा । अत्थि[1] अणुमदं तेण[2] ।

महेन्द्रः[3] । रम्भे[4] साधीयांसमुदन्तमानीतवती । गच्छ त्वं समुचितनियोगकरणाय[5] ।

रम्भा । तध त्ति[6] निष्क्रान्ता ।

नेपथ्ये

वैतालिकः[7] ।

आधूय[a)] प्रणयं विवस्वति[b)] गते देशान्तरे[8] पद्मिनी[c)]
सोढुं तस्य[9] वियोगमक्षमतया म्लायत्सरोजानना[10] ।
संध्यावल्कलिनी[d)] द्विरेफपरिषद्रुद्राक्षमालावती[e)]
[11]तत्प्राप्तिस्पृहयेव[f)] संप्रति तपःसक्ता समालक्ष्यते ॥ १७ ॥

---

1 T *atdhaṃ*, tagMm$_2$ *addhi*, O *acchi*. **2** kTKtOBaMm$_2$ *deṇa*. **3** B om. **4** O om. **5** h °*kāraṇāya*. **6** ktO *tahā iti*, M *taha tti*, TRB *tatheti*, Kam$_2$ *taha iti*, HhD *tahetti*, g *taheti*. **7** tOB °*kāḥ*. **8** kTKHh °*raṃ*. **9** h *yasya*. **10** K *mlāna*°. **11** O °*spṛhayaiva*.

---

a) hitvā (**am$_2$**).

b) divākare; anyatra deve Parameśvare (**a**).

c) padmabahulā sarasī; anyatra padminījātistrī; Pārvatīty arthaḥ (**am$_2$**). padminīlakṣaṇaṃ tūktaṃ Ratimañjaryām:

bhavati kamalanetrā nāsikākṣudrarandhrā
aviralakucayugmā cārukeśī kṛśāṅgī
mṛduvacanasuśīlā gītavādyānuraktā
sakalatanusuveṣā padminī padmagandhā.

(Dies Zitat auch bei **m$_2$**.) Beiträge zur ind. Erotik p. 224.

d) saṃdhyaiva valkalam . . . anyatra saṃdhyeva valkalam; raktavarṇavalkaladhāriṇīty arthaḥ.

e) . . . anyatra bhramarasamūhasamānarudrākṣamālādhāriṇīty arthaḥ.

f) prāptau udaye; anyatra lābhe bhartṛtveneti śeṣaḥ. [Alles nach **a**; **m$_2$** ganz ähnlich.] Die ganze Strophe ist also doppelsinnig, da *Vivasvat* sowohl „Sonnengott" als auch „*Śiva*" sein kann und *padminī* nicht nur „Lotusteich" bedeutet, sondern auch eine Umschreibung für *Pārvatī* sein kann, die wegen ihrer körperlichen und sonstigen Vorzüge in die Kategorie der *padminī*, die erste Klasse der Frauen, gehört. (Beiträge zur indischen Erotik[1], p. 220 ff.).

महेन्द्रः । आकर्ण्य[1] । वयमपि संध्यां वन्दितुं[2] साधयामः ।

इति निष्क्रान्ताः सर्वे ।

इति तृतीयो ऽङ्कः ।

ततः प्रविशति गृहीतमुनिविग्रहो[3] नन्दी ।

नन्दी । आज्ञप्तो ऽस्मि भगवता[4] नीललोहितेन यथा । नन्दिन् । मन्मथदाहेन भग्नमनोरथा पार्वती [5]मन्निबन्धनेन[a)] भावेन महान्तं नियममनुतिष्ठन्ती गौरीशिखरनाम्नि[6] पितुः शिखरे तपश्चरति । तपस्यन्त्याश्च[7] तस्या व्यतीतो बहुतिथः[8] कालः । तद्भवान्गृहीतमुनिवेषस्तत्र गत्वा[9] कीदृशो वा तस्या नियमः कीदृशो वाप्यभिलाषबन्ध[10] इति तत्सख्योर्जयाविजययोर्मुखेन विदित्वा पुनरागच्छत्विति । तत्प्रभोर्नियोगमनुतिष्ठामि[11] । इति परिक्रामन्विमृश्य[12] । प्रकृतिकठिनानि खलु स्त्रीणां चेतांसि । तथा हि ।

एषा शिरीष[b)]सुकुमारशरीरयष्टि-
श्चान्द्री कलेव नयनोत्सवमावहन्ती ।
संचेतुमिच्छति[13] शिलाकठिनैः शरीरैः
संपादितान्यपि तपांसि तपोधनानाम् ॥१॥

1 DRB om. *ākarṇya.* **2** O *vidhātuṃ.* **3** DO om. *gṛhīta*; h *°veṣo.* **4** M *tatrabhavatā.* **5** kKHhRB *°bandhena,* MTD O a m_2 *°baddhena.* **6** DO *°śikhari°.* **7** a M m_2 *tapaś carantyāś ca.* **8** Og *°tithiḥ,* h *tithi.* **9** t a g m_2 *tad bhavāṃs* [g *bhavān*] *tatra gatvā*; TKHRBgM *parigṛhīta°.* **10** kDtOg *vābhilāṣa°.* **11** T *niyogaṃ upa°*; K *niyamam.* **12** B om. *krāman.* **13** M *icchasi.*

a) **a**: „with an affection strongly bound or fixed in me“; **Gl** einfach „aus Liebe zu mir“.

b) śirīṣavad araṇyakadalīkusumavat (**a** $\mathbf{m_2}$).

अपि च ।

शेते या किल हंसतूलशयने निद्राति सा स्थण्डिले
वस्ते[1] या मृदुलं दुकूलमबला गृह्णाति सा वल्कलम् ।
या वा[a)] चन्दनपङ्कलेपशिशिरे[b)] धारागृहे[c)] वर्तते
पञ्चानामुदितोष्मणां[d)] हुतभुजां सा मध्यमासेवते[2] ॥२॥

ततः प्रविशतः कुसुमावचयमाचरन्त्यौ[3] जयाविजये ।

जया । हला विजए तवच्चरणे किदमदीए[4] पिअसहीए गोरीए[5] मणोरधकप्पद्दुमो[6] कदा फलं दंसइस्सदि ।

विजया । हला जए तधा[7] मम्मधदाहपरुसहिअओ[8] णिक्करुणदाए पढमं[9] णिदंसणभूदो[10] परमेसरो[11] जदा अद्दहिअओ[12] भविस्सदि[13] तदा फलं दंसइस्सदि[e)] ।

इति पुष्पावचयमाचरतः[14] ।

नन्दी । इमे खलु तस्याः प्रियसख्यौ जयाविजये । यावदुपसर्पामि । तथा[15] करोति ।

---

1 KRB *vāste*, D *dhatte*. **2** M *adhyāsyate*. **3** TKHh DROM *°pacayam*; M a m_2 *abhinayantyau*. **4** t g *°tīe*; h t g om. *piasahīe*. **5** Nur H O *Gorīe*. **6** Alle *maṇoraha°* (T *ruha°*, O *maṇohara°*). **7** k H t a g m_2 *tahā*, TKhROBM *taha*. **8** T *Vammaha°*, alle anderen *Mammaha°*; M *°parissahiao*. **9** M k h *puḍamaṃ*, T K *puḍama*, H *puṭamaṃ*, R O B *puḍhama*. **10** R B *ṇiddaṃsaṇa°*; M *daṃsaṇa°*; TKHhOg *°hūdo*, R *°hūto*. **11** k t a g m_2 *paramessaro*. **12** t^1 a g m_2 *adaddha°*, t^2 *daddha°*. **13** k t O a g m_2 *huvissadi*, h *havisaddi*. **14** TKHhDOM *puṣpāpacayam*, R mit über dem *p* gesetzten *v*. **15** K *iti tathā*.

---

a) yā vā yā ca; veti samuccaye (**a**).

b) **a**: *paṅka* here means ‚a thick mass'; ‚a large quantity'. Das Richtige ist „Salbe“, „Paste“.

c) vāriyantragṛhe (**a** m_2): ein Haus (oder Zimmer) mit Wassermaschinen, d. h. Douchen, Wandbrunnen u. dgl.

d) gārhapatyāhavanīyadakṣiṇasabhyāvasathyaś ceti pañcāgnayaḥ (**a**); caturdikṣu catvāro 'gnayaḥ upari sūryaḥ (m_2).

e) **Gl**: „Wenn Śiva, welcher zunächst in der Verbrennung des Liebesgottes ein hartes Herz gezeigt hatte, wieder versöhnt [?!] wird, dann wird er [!] wohl Früchte zeitigen“.

जया। हला मह[1] पुप्फकरण्डअं पूरिदं[2] पुप्फेहिं। तुह[3] उण कधं[4]।

विजया। पुष्पकरण्डकं[5] विलोक्य। मह[6] उण अज्ज पूरिदं[7]। अवसिट्ठं[8] पूरइस्सं। इति पुष्पकरण्डकं[9] पुष्पैः पूरयति।

नन्दी। उपसृत्य। भद्रं भवतीभ्याम्।

जयाविजये। भअवं वन्दामो[10]।

नन्दी। के युवां किंनिमित्तं वा पुष्पावचयमाचरथः[11]।

जयाविजये[12]। अम्हे हिमवन्तस्स[13] कण्णआए[14] गोरीए[15] पिअसहीओ[16]। तवच्चरणणिअमट्ठिदाए ताए[17] देवपूआपुप्फाइं अवचिणुमो।

नन्दी। किंनिमित्तं वा[18] तपस्तस्याः।

जया। अणुरूवं[19] वरं लहेअं ति[20]।

नन्दी। को ऽसावनुरूपो[21] वरः।

जया।

जं किल भणन्ति[22] वेआ णिच्चजुवाणं[a)] पुराणपुरिसं च[23]।
जो किल धारइ[24] णिच्चं ईसरसद्दं च चन्दलेहं च[25] ॥ ३ ॥

---

1 k t a M m_2 *mama.* **2** K *pūryaṃ.* **3** R B *taha,* t a m_2 *tua.* **4** M k T K t O a g m_2 *kahaṃ.* **5** D R B °*karaṃḍaṃ.* **6** k *mama.* **7** K *pūryaṃ,* T R O B *pūriaṃ.* **8** T K R B M *avisesaṃ,* h *avisesa,* H a m_2 *avasesaṃ,* g *avasissaṃ,* O *avaavaśiṣṭaṃ.* **9** D R B °*karaṃḍaṃ.* **10** M *a*°*a* statt *bhaavaṃ*; K *vandāvahe.* **11** T K H h D O M *puṣpāpacayam,* R mit *v* über dem *p*; k °*tha,* T K O °*taḥ,* H h *āracayatha* [H °*thaḥ*]; M om. *vā*; *puṣpā*° *kinnimittam ā*°. **12** k D t O B a g M m_2 *ubhe.* **13** k h t a g m_2 *Himavadassa,* T °*tassa.* **14** k t g *kaṇṇāe.* **15** Alle außer H *Gaurīe.* **16** M *piasahīe.* **17** T om. *tāe.* **18** K om. *vā*; *tapaś ca.* **19** T °*rūpa,* R B M °*rūva,* O °*rūha.* **20** k R t O B a g m_2 *tti,* h *di,* K *laheyantī.* **21** O °*rūpa.* **22** k T K t a g m_2 *bhaṇandi,* O *bhaṇati*; M *veā phaṇaṃti*; darüber *pha*° *veā.* **23** K °*purūsaṃ yya,* M h O °*purusaṃ,* t a g m_2 *pulāṇapulisaṃ* [m_2 *pulāna*°!], a °*pulisaṃ a*; M m_2 *a* st. *ca.* **24** T *dhārayayi,* K *dhārayi,* alle anderen *dhāraï.* **25** T *ṇaṃ* st.

---

a) anādipuruṣam ity arthaḥ (**a**).

एसा[1] णो पिअसही तं जेव्व परमेसरं[2] पदिं[3] अहिल-
सन्ती[4] महिन्दप्पमुहे[5] लोअवाले[a)] अवमसिअ तवच-
रणं करेदि[6]। किं च मम्मधदाहिवेरादो[7] पिदुणो[8] घरं[9]
पविसिअ[10] बलिअं[11] उक्कण्ठिदा[12] आसि[13]।

नन्दी। तत्कथम्। उच्यताम्।

जया।

पण्डुक्खामसरीरा[14] झत्ति किल[15] णमन्तवअणसरसिरुहा[16]।
खीणा[17] पव्वइणलिणी[18] पसुवइणो[19] विरहगिम्हेण[20] ॥ ४ ॥

नन्दी। ततः परं[21] कथमासीद्वां प्रियसखी।

ṇiccaṃ, K *ḷiccaṃ*, O *ṇicca*; k t a g m_2 *īssara*°; K °*sadda yya*; M *a caṃcalehaṃ a*; a °*saddaṃ a*; m_2 beide Male *a* statt *ca*; t a °*lehāṃ*; T nur *caṃdarasarasaṃ*°*daṃ ca*.

1 T B *eṣā*, K *yesā*. **2** k t a g m_2 *Paramessaraṃ*, O °*svaraṃ*. **3** k T H R t B a g M m_2 *païṃ*, h *paï*, K *payiṃ*. **4** k K h t a g M m_2 °*sandī* (°*saṃdī*), T °*saṃta*. **5** M h *Maheṃda*°, R B *Mahīṃda*°, O *Maïṃda*°, g *Mahiṃdda*°; k t a g m_2 °*ppamuhaṃ*, R B °*ppamuha*; k t a g m_2 *loapālaṃ*, O *lloavāle* aus °*lo* korrigiert, K *meḷāvāḷe*, R B om. *vāle*. **6** K *kareyi*, h *karedī*, alle anderen *karei*. **7** M m_2 *kiṃ a*; H *Vammaha*°, O B *Mamaha*°, T nur *maha*; T K R O B g °*dāha*°, H h °*ḍāha*°; k °*virahādo*, T K °*vairādo*, M °*vaïādo*, B °*vāharādo*, die anderen *vaïrādo*. **8** R *pituṇo*. **9** T *saraṃ*, h *varaṃ*. **10** k t a g *ppavisia*, T *pavia*, h *pavisīa*. **11** K *baliyaṃ*, h *balīyaṃ*, T R t B *balaaṃ*, g *valaaṃ*. **12** T *duṃkaṃṭhica*, K °*iyā*, H h R B M °*īā*; a *ukkhaṇḍidā*. **13** T *āyāsi*, alle anderen *āsī*. **14** k t O a g m_2 *pāṇḍu*°, R B *pāṃḍuḥ*°, K *paṇ-ḍuḥkāma*°; T °*sarīra*. **15** K *jaṭidi*, t g *jhaḍidi*; T *kilamaṃta-vaaṇa*°, K *kiḷantavaaṇa*°, alle anderen om. *kila*. **16** R B *ṇamaṃ-taṃ*; M *viṇamaṃta*°, m_2 *avaṇamanta*°. Alle Texte außer m_2 metrisch falsch! **17** k t a g m_2 *kkhīṇā*, T *jhīṇā*, K *jiṇṇa*, H *śiṇṇā*, h *śīṇā*, R B *sīṇṇā*, O *kṣīṇā*. **18** T *Paṃbhavaṇalinī*, K *Pavva-yinalinī*, h *Pavaī*°, O *Pāvvaï*°, M *Pavvaï*(?)*ṇalinī via*. **19** k t a g m_2 *Pasupaïno*, K °*vayiṇo*, O *Pasūvaïva*. **20** h *viha*°, O *virahi*°; k H h R °*gihmeṇa*, T °*ga*°*bheṇa*, T °*giṇhena*, t g °*ggaheṇa*, O °*ggiheṇa*. **21** t a g om. *paraṃ*.

---

a) **a** zitiert hierzu Amara:
Indro Vahniḥ Pitṛpatiḥ Nairṛto Varuṇo Marut
Kubera Īśaḥ patayaḥ pūrvādīnāṃ diśāṃ kramāt.

जया । अदो वरं सुणु ।

चच्चं[1] वारइ[2] [3]चन्दणद्दिपवणप्फंसं[a] ण संमसए[4]
सेज्जं[5] पल्लवकप्पिअं[6] ण सहए[7] चन्दाअवं[8] णिन्दइ ।
णो वा पोम्मपलासणिम्मिअथणप्पावारअं[9] खम्मए[10]
सा णीहारसिलाअले सुणु परं[11] तावादुरा[12] वट्टइ[13] ॥५॥

नन्दी । एवं प्रबलमदनज्वरा[14] सा पश्चात्किं कृतवती ।

उभे[15] । पच्छा कं पि[16] उवाअं[17] अपेक्खन्ती[18] तवच्चरणेहिं परमेसरं[19] अहिमुहीकादुं[20] पउत्ता[21] तधा[22] तिव्वणिअमं[23] करेदि[24] ।

नन्दी । कथय[25] कीदृक्पशुपतेरस्यामनुरागः[26] ।

---

1 k *candaṃ*, T *caṃca*, h *caṃcaṃ*, tagm$_2$ *cacca*, O *saccaṃ*. **2** tagm$_2$ *vvāpida*, M *vāpida*. **3** kKtaMm$_2$ *°ppassaṃ*, HhRB *°ppaṃsaṃ*, O *°pphasa*, g *°ppassaṇ*. **4** k *saṃmaṇṇaï*, T *°māṇaa*. **5** kKhRtBagm$_2$ *sajjaṃ*, T *sajja*, O *sacaṃ*, M *sa°aṃ*. **6** kt *°kappidaṃ*, g *°kaṃpidaṇ*, O *°kaṃpia*. **7** k *sahaï*, tagm$_2$ *sahade*, M *sahaï*. **8** h *caṃ°dāaṇaṃ*, RB *caṃdāvaṇaṃ*, aMm$_2$ *candādavaṃ*. **9** tag *ppomma°*, O *pamma°*, M *pe°mavilāsa°*; O *°ṇimia°*, K *°ḷimmiya°*; tagm$_2$ *°taṇu°*; M *aṇa °vāvāraaṃ khīmae*; tg *°ppāvāramakkhammae*. **10** m$_2$ *kkhammae*, k *khammaï*, O *khaṇie*. **11** M *suṇa*; kTKHtagM *varaṃ*. **12** RB *°turā*; O *tādukaraṃdui*. **13** T *veṭṭaï*, K *veṭṭayi*. **14** g om. *madana*; M *°jvarāt*. **15** T *Ja°*, K *Jayā*, HhR *Jayā Vijaye*. **16** tg *kiṃ*; alle Texte *vi*. **17** hRB *upāaṃ*. **18** TM *adaṃkhaṃtī*, K *adakhkhandi*, HO *adakkhaṃti* (*°i*), htagm$_2$ *adekkhantī*, RB *adaṃsaṃtī*. **19** ktagm$_2$ *Paramessaraṃ*. **20** TRtBg *°mukhi°*, M *°muhaṃ*. **21** TKHhRM *pavuttā*, B *pavvuttā*. **22** ktagm$_2$ *tahā*, HhROBM *taha*; TK om. **23** T *mahadaṃvoṇiamaṃ*, K *mahandaṃ tavoṇiyamaṃ*, RB *tātīvvaṇiayaṃ*. **24** K *kareyi*, alle anderen *karei*. **25** tagm$_2$ om. *kathaya — jāṇādi*. **26** T *kīdṛg asyāṃ Paśu°*, D *°pates tasyām*, h om. *asyām*.

---

a) Das „Sandelgebirge“ ist der Malaya; der von dorther kommende Wind entspricht etwa — wenigstens in der Wirkung auf liebende Herzen — unseren „linden Lüften“.

जया । असोसं उण[1] सुमहन्तो दिट्ठिराओ[2] । अदो वरं[3] सो ज्जेव[4] जाणादि[5] ।

नन्दी । तत्किमनेन संदिग्धफलेन दुर्लभवस्तुप्रार्थनानिर्बन्धेन[6] । देवेष्वियं यं कंचिदनुरूपं[7] वरं वृणीताम्[8] । अयं पुनः खण्डपरशुरग्रणीरिव वीतरागाणाम्[9] । तद्बुद्धिमुपदिशतां भवत्यौ[10] प्रियसख्याः[11] ।

जया । भअवं एव्वं[12] अम्हाणं पिअसहीए[13] ववसिदं[14] जधा[15] परमेसरं[16] जेव्व[17] पदिं[18] लहेअं[19] । अणधा[20] एत्थ[21] जेव्व[22] सिहरे[23] कढिणेहिं[24] तवच्चरणेहिं[25] विलीणा भवेअं ति[26] ।

नन्दी । आत्मगतम् । श्रुतं श्रोतव्यम् । तमिमं[27] वृत्तान्तं

---

1 k T H h R B *puṇa.* **2** M om. *diṭṭhirāo*; k *aṇurāo*, K *diṭṭirāyo*, O *diḍhirāvo*, H *diroo*, h *di°roo*, R *diraroo*, B *dirarāo.* **3** T *varī*, h M *vari.* **4** k H h R B M *evva*, T O *eva*, K *yavva.* **5** k M *jāṇāi*, K *jāṇāyi*, T H h R O B *jāṇaï.* **6** Alle außer k t a g om. *vastu*; T °*nibaṃdha*, K g °*nibandhanena*, h R B M °*nibaṃdhaṃ.* **7** D om. *deveṣv — vṛṇītām*, T K H h R B M om. *iyaṃ* [t_2 hat *imaṃ*]; M dafür *atha*; t a g m_2 om. *yaṃ*; T *yat kiṃcid*, H *yaṅ kiṃcid*, h *iyat kiṃcid*, R B *deveṣv api yat kiṃcid.* **8** T H R t^1 a g M *vṛṇīyatām*, B *vṛṇīyātām*, K *vṛṇutām.* **9** T K H °*rāgiṇām*, R B °*rāgīṇām.* **10** h *bhavatyā.* **11** t a g m_2 *sakhyau.* **12** O om. *bha° evvaṃ*; T *eddaṃ*, K H R t B a g M m_2 *edaṃ.* **13** T *piasahī ahmāṇaṃ.* **14** k a m_2 *vvava°*, T *evavasidaṃ*, O *vasidaṃ*, g *vavvasidaṃ.* **15** k t a g m_2 *jahā*, T K H h R O B M *jaha.* **16** k t a g m_2 *Paramessaraṃ.* **17** k T R t B a g M m_2 *evva*, K *yavva*, h *evaṃ*, O *pakva*, H om. **18** K *payiṃ*, alle anderen *païṃ.* **19** T *labheyaṃ*, R *labheaṃ*, O *ahejaṃ*, K *laheyam.* **20** k T H h R t B a g M m_2 *aṇṇahā*, K *aṇṇaha*, O *aṇṇaā.* **21** k T t a g m_2 *attha*, K *yattha.* **22** k K H h t a g M m_2 *evva*, T *evva a*, R O B *eva.* **23** K *pavvayasihare.* **24** k T R t B a g M m_2 *kaṭhi°*, K *kaṭi°*, O *kahi°.* **25** T °*ccalaṇehiṃ*, H h °*ccala°.* **26** T *bhavīaṃ*, K *bhaveyan tī*, H M *bhavemi°ti*, h *have°ti*, R *bhave(me)mīti* [so!], B *bhavemīti*, O *bhavāmiti* [so!], k t a g m_2 *bhaveaṃ tti.* **27** R B om. *tam*; h om. *tam imaṃ.*

नीललोहिताय निवेदयामि । प्रकाशम् । भद्रे यथागतं गमिष्यामः[1] । इति[2] निष्क्रान्तः ।

जया[3] । अम्हे वि[4] पिअसहीए पूआपुप्फाइं उवहरामो[5] । इति निष्क्रान्ते ।

इति मिश्रविष्कम्भः[6] ।

ततः प्रविशति नैष्ठिकभूमिकावलम्बी शंकरः ।

शंकरः । आत्मानं निर्वर्ण्य । पर्याप्तेयं[7] भूमिका पार्वतीं प्रतारयितुम्[8] । तथा हि ।

अंसे कृष्णाजिनश्रीस्त्रिगुणविरचिता मेखला[a)] श्रोणिभागे
पाणावाषाढदण्डो[b)] भसितविरचितं पुण्ड्रकं भालदेशे[9] ।
दर्भैः क्लृप्तं[10] पवित्रं[c)] श्रवसि परिणमन्मातुलुङ्गीपिशङ्गी[d)][11]
मौलौ पङ्क्तिर्जटानां[12] जपवलयमिदं[13] स्फाटिकं च प्रकोष्ठे ॥ ६ ॥

---

1 kKHh *gamiṣyāmi.* 2 Th om. *iti.* 3 R *Ja° Vi°.* 4 THhROBM om. *vi.* 5 K *upa°*, O *ucca°.* 6 *iti* nur in kKta; ktg *°bhakaḥ.* 7 H *prāpteyaṃ.* 8 tg *prati pra°.* 9 Alle außer ktg *phāla°.* 10 D *darbhotkṣiptaṃ*; TK *kliptaṃ*, Hh *kṣiptaṃ.* 11 O *para°*; T *°ṇamat°*; T *°mātuliṃgī°*, K *°laṅgī°*; alle anderen *°mānatuṅgī°.* 12 M *pattir.* 13 t *jaya°.*

---

a) Aus *muñja* — Gras (Saccharum munja Roxb. = S. arundinaceum Retz.) gefertigt.

b) Ein Stock aus palāśa-Holz (Butea frondosa Roxb.).

c) „A ring made of Kusa grass, worn on the fourth finger, which is to be used only on religious occasions and not always. At other times it is usual to have it placed on the right ear, just as students do with their pencils or pens when not using them“ (**a**).

d) **a** erklärt die Lesart *pariṇamanmānatuṅgī* mit pariṇamac ca mānaṃ ca pariṇamanmānaṃ tena tuṅgī unnatā. uttarottarābhivṛddhajaṭāpariṇāmavatīti bhāvaḥ. **m**$_2$ glossiert darbhaiḥ kuśaiḥ klptaṃ racitam | pariṇamat avalambamānaṃ pavitraṃ karmakāle pāṇāv upayojyaṃ pavitram | rājati | maulau cūḍāyāṃ mānena pariṇamena tuṅgī unnatā atyantapravṛddhety arthaḥ |

विचिन्त्य ।

यत्सा मन्मथमोहनास्त्रसमये सापत्रपा चारुणा
वक्त्रेण[1] स्मितफुल्लगण्डफलकं व्रीडाविलोलेक्षणम् ।
उन्मीलत्पुलकाङ्कुरं स्थितवती प्राप्तेव[2] रूपान्तरं
तन्वी तत्पुनरद्य चेतसि मम प्रादुर्भवत्यञ्जसा ॥ ७ ॥

तदिदानीमेव गाढतरतरणिकिरणाक्रान्तामिव[3] मेदिनीं[4] मेघः[5] कठिनतपोविशेषतस्तामभ्युपपत्स्ये[6] । यद्येवं[7] जयाविजयाभ्यां निवेदितो भावबन्धस्तस्या नन्दिना मह्यमर्पितस्तदैवात्मानमपाकर्तुमिवा[a)]वधारयामि[8] । इति सविनयं परिक्रामति ।

ततः प्रविशति जयाविजयाभ्यामन्वास्यमाना तपस्यन्ती[9] पार्वती ।

पार्वती । वामाक्षिस्पन्दनं सूचयित्वा[10] । हला[11] सहीओ[12] ।

आणन्दबाहसिसिरं[13] अकारणं[14] फुरइ लोअणं वामं ।
मह मन्दभाइणीए[15] जाअइ[16] एअस्स[17] अज्ज किं णु फलं ॥ ८ ॥

---

1 D *vastreṇa.* **2** H *prāptaiva.* **3** hRM om. *tara*; h °*taraṇī*°, D °*tariṇi*°; H °*kiraṇai*°; ktagm₂ °*pariklāntām.* **4** K *medinīm evaṃ kaṭina*°, RB *medinīm eva kaṭhina.* **5/6** D *meghaś cātakīm iva vā tayor viśeṣatas tām*; tOam₂ *meghaś cātakīm iva kaṭhina*° [*kaṭhinatara*°]. **6** HDRB °*viśeṣas tām*, h °*viśeṣetaḥ tām*, O °*trastāṃ tāṃ samyag upapatsye*; TK *abhyavapatsye*, HhM *abhyupatsye*, D *anupatsye.* **7** T *yady eva*, K *yadaiva*, H *yadyaiva*, am Rande *yadaiva*, tam₂ *yadaivaṃ*, g *yad evaṃ.* **8** k *tad ātmānam*, hRtBaM *tad evātm*°, O *tadaivam ātm*°, g *tad evam ātm*°; k *aparaktam*, Th *aparākarṇam*, K *aparākaṇṭam*, HDRB *aparākartum*, M *varākam ivāvadhāra*°. **9** om. K. **10** K add. *Pārvatī.* **11** T *sahaḷa.* **12** M *sahio*, ktam₂ *ppiasahio* (am₂ °*io*). **13** Alle Texte außer M °*vāha*°; T °*sisaraṃ*, O °*śiśiraṃ.* **14** TK *akāḷaṇaṃ*, HhRBg *akālaṇaṃ.* **15** H °*hāiṇie.* **16** K *jāyeya.* **17** kMg *edassa*; M *kiṃ ṇu a*°*ja phalam.*

---

c) apākartum iva dātum iva | avadhārayāmi niścitavān abhavam | vartamānasāmīpye bhūte laṭ (**m₂**). Er übersetzt: „Her attachment towards me . . . is, I think, to point out how powerless I am“.

जया । हला पव्वदि । इत्थिआणं वामक्खिचलणं पुरु-साणं[1] दक्खिणक्खिचलणं सुसउणं ति[2] पोराणिआ[3] भणन्ति[4] । तधा[5] मम्मधदाहणिक्करुणो[6] वि परमेसरो[7] कस्स वि मुणिणो मुहेण तुमं अणुगिण्हस्सदि[8] ।

पार्वती । सच्चं होदु पिअसहीए वअणं[9] ।

शंकरः[10] । पार्वतीं दृष्ट्वा ।

क्वेदं तपः कठोरं क्वेदं सुकुमारमङ्गमबलायाः ।
दिवसः कुत्र घनोष्मा कुत्र
कला[11] कमलकोमला[12] चान्द्री ॥ ९ ॥

अहो महान्तं तपःक्लेशमनुभवति[13] मामुद्दिश्य मञ्जुभाषिणी ।

जया । विलोक्य । हला पव्वदि[14] गहिदतणू[15] विअ पढमस्समो[16] जुवा को वि महापुरुसो[17] इदोमुहो[18] आअच्छदि[19] ।

पार्वती[20] । आअदाणं[21] अदिहीणं[22] तुम्हेहिं अच्चणा

1 K *purūsāṇaṃ*, alle anderen außer O M *purisāṇaṃ*. 2 h *susaüṇa vati*, t g *suuṇaṃ*; k t a g m_2 *tti*. 3 K *porāṇīyā* k T H D t a g m_2 *paürāṇiā*, h *paürāaṇiā*, R B *paurāṇiā*, O *paürāā*. 4 k K h t a g m_2 M *bhaṇandi*. 5 O om. *tadhā aṇu°*; k R t B a g m_2 *tahā*, T K H h M *taha*. 6 T K H *Vammaha°*, die anderen *Mammaha°*; t_2 *°dāhā°*. 7 k t O a g m_2 *Paramessaro*. 8 K *aṇugāhi°*, R *aṇugaṇhi°*, B *aṇuggahi°*. 9 m_2 *°sahīo*; k t a g m_2 add. *Vijayā saccaṃ bhaṇidaṃ sahīe Jaāe*. 10 O *Śaṃbhuḥ*. 11 H h D R O B *ca*, M *ca vā* statt *kalā*. 12 T K om. *kamala*; h *sitakamala°*; O *kamalasukomalā*. 13 t B g a *mahattapaḥ°*; h *°bhavatī*. 14 T *Pavvayi*, K *Pavvai* [so!], alle anderen *Pavvaï*. 15 k H h R t B a g m_2 *gahia°*, O *gāhia°*, K *gahīya°*; T *°ataṇū*; M *°taṇā*. 16 k T K O g *puḍa°*, h *pūḍa°*, H R B *puḍha°*; T O *°massajo*; M *puḍamaṃpajo*. 17 K *°purūso*, O *māhāpuruso*, alle anderen *°puriso*. 18 T *°mahī*; M *ido evva*. 19 T K h *āyacchaï*, alle anderen *āacchaï* (M *āaccaï*). 20 K add. *ātmahitaṃ*. 21 K *āyadaṃ*, R B *āadaṇaṃ*. 22 K *adihiṃṇaṃ*, O *adahiṇaṃ*; T H add. *mahiṇaṃ*, K *muṇiṇaṃ*, h *mahiṇaṃ*, R *nahīṇaṃ*, O *mahiṇa*, a M m_2 *mahesiṇaṃ*

कादव्वा[1]। अहं उण जधापुव्वं[2] णिअमं अणुचिट्ठामि[3]।

इति मौनमवलम्बते[4]।

शंकरः। निर्वर्ण्य।

आभाति वल्कलवती पाण्डुक्षामा[5] मदीयविरहेण।
प्रतिपत्कलेव चान्द्री संध्याशकलेन संवीता[6] ॥ १० ॥

इति समीपमुपसर्पति। जयाविजये विष्टरमुपनयतः[7]। शंकर[8] उपविश्य मार्गपरिश्रमं[9] नाटयति। पार्वती सख्यौ विलोकयति[10]। जयाविजये[11] वर्णिनं तालवृन्तेन वीजयतः[12]।

शंकरः। हस्तमुद्यम्य। गतः[13] श्रमो ऽस्माकमनन्यसामान्येन भवतीनां सौजन्येन।

उभे[14]। सविनयम्। कुदो आअच्छदि महापुरुसो[15]।

शंकरः[16]। अद्य[17] कैलासादागम्यते।

जया। जइ[18] एव्वं[19] अग्घं[20] पडिगेण्हादु[21] महापुरुसो[22]।

शंकरः। तथेत्यर्घ्यप्रतिग्रहं[23] रूपयित्वा। भद्रे एकं प्रष्टुमभिलषामो भवत्यौ[24]।

जया[25]। पुच्छदु[26] महापुरुसो[27]।

---

1 K *kāduvva*, O *kadāvvā*. **2** k t_2 *jjahā°*, t_1 O a g m_2 *jahā°*, K H h R B M *jaha°*. **3** h *°ci°ṭhemi*, O *°cidāmi*. **4** R t B a g m_2 *ālambate*. **5** R B *pāṃḍuḥ°*. **6** O *saṃvalitā*. **7** K M *Jayā vi° upānayati*. **8** O *Śambhuḥ*. **9** R B *mārgaśramaṃ*, k t a g m_2 *°khedaṃ*. **10** T *vīkṣyate*, K *vīkṣate*, H *vilokate*, h R B M *vilokyate*, D O *°kayataḥ* [D *Pārvatīm*]. **11** k t a g m_2 *sakhyau*, om. T R O B. **12** h *°ti*. **13** K H h *gata*, O *apagataḥ*. **14** T *Ja°*, K *Jayā*, H h R *Jayā Vi°*. **15** M *āa°caï*; alle außer T K M *°puriso*. **16** O *Śambhuḥ*. **17** T R B *ādya*. **18** T *jadi*, K *jayi*. **19** t^1 *evaṃ*. **20** K *aggaṃ*, O *aghaṃ*. **21** T R B *°gaṇhādu*, O *°gaṃṇhātuṃdu*, K *°giṇṇādu*, H h *°giṇhādu*, M *°hadu*. **22** K *°purūso*; alle anderen außer M *°puriso*. **23** k t O a m_2 *tathā ity*; h *°parigrahaṃ*. **24** k *bhavatyā*, D *bhavatyai*. **25** H h R *Jayā Vi°*. **26** h M *pu°chidu*, R B *pucchaü*. **27** K *°purūso*, die anderen außer M *°puriso*.

शंकरः[1] । कस्येयं दुहिता के[2] भवत्यौ किंनिमित्तं वासौ[3] कठोरे तपसि वर्तते ।

जया[4] । एसा[5] णो पिअसही हिमवन्तस्स[6] कण्णआ पव्वदीणामहेआ । अम्हे वि से[7] पिअसहीओ जआविजए । अणुरूववरलाहणिमित्तं[8] च[9] से[10] तवच्चरणं[11] ।

शंकरः[12] ।

जन्मान्ववाये[13] प्रथमस्य[14] धातुः[a)]
पिता गरीयान्गिरिसार्वभौमः ।
वपुर्मनोहारि वयश्च[15] रम्यं
पदं च लोकादतिलोकमस्याः ॥ ११ ॥

तत्को ऽनया[16] प्रार्थनीयो वरस्त्रिलोक्याम्[17] ।

जया । अत्थि[18] को वि महापुरुसो[19] ।

शंकरः[20] । को ऽसावात्मसौभाग्यविशेषदुर्विदग्धः[21] कठिनहृदयः ।

जया । महापुरुस[22] सुणाहि[23] दाव । जं किल भणन्ति[24] वेआ

---

1 O *Śaṃbhuḥ*. 2 TK *ke vā*; h *kau bhatyau* (so!). 3 *asau* nur TK. 4 DO *Jayā Vi°*. 5 K *yesā*, RB *eṣā*. 6 ktagm$_2$ *Himavadassa*, Th *°vaṃtasya*. 7 T *imāa*, K *imāye*. 8 t *anurūva°*, h *°rū°va°*, O *°rūvavalahaṇimittaṃ*. 9/10 k *a se*, THhO *ca se*, K *ya assa*, R *assae*, tam$_2$ *a asse*, B *massae*, g *asse*, M *va se i*. 11 h *°ccalaṇaṃ*. 12 O *Śaṃbhuḥ*. 13 D *janmānvaye 'syāḥ*. 14 K *prathitasya*. 15 TM *vapuś ca*, K allein *vayaś ca*, alle anderen *vacaś ca*. 16 Alle außer DO *kim anayā*. 17 T *vara iṃdralokyaḥ*, am Rande *trilokya*, D *naras*, O *°nīyosti tri°*. 18 gM *addhi*. 19 K *°purūso*, die übrigen außer M *°puriso*. 20 O *Śaṃbhuḥ*. 21 RB *ātmano viśeṣa°*; D om. *viśeṣa*, K *°vidagdha*. 22 T *°purisā*, K *°purūsa*, O *°puruso*, m$_2$ *°purisa*. 23 Ktg *suṇu*, RB *suṇehi*, M *ṇāhi*; KaMm$_2$ om. *dāva*. 24 Khtagm$_2$ *bhaṇandi* (*°ṃdi*).

---

a) vedhasaḥ Hiraṇyagarbhasyānvavāye kule (**a**).

इत्यादि पठित्वा[1] । तं जेव्व[2] परमेसरं[3] पदिं अहिलसन्ती[4] णो पिअसही तवोणिअमं अणुचिट्ठदि[5] ।[a)]

शंकरः[6] । पार्वतीं प्रति । भद्रे अपि[7] सत्यमेतत् ।

